**अपर्य्युषित** त्रि० न पर्य्युषितः। अभिनवे सद्योभवे पुष्पादौ। "अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्ज्जितैरिति" नर०पु०।

**अपर्वदण्ड** पु० अपर्वा दण्ड इव। रामशराख्यशरभेदे तस्येतरशरस्येव ग्रन्थियुक्तत्वाभावात्तथात्वम्।

**अपर्वन्** त्रि० नास्ति पर्व्व ग्रन्थिः ग्रन्थप्रकरणपरिच्छेदो वा यस्य। ग्रन्थिशून्ये दण्डादौ विच्छेदशून्ये ग्रन्थादौ च। वा कप्। अपर्व्वकोऽप्यत्र त्रि०। "यदपर्व्वकं स्यात् प्रदक्षमिति" शत०ब्रा०। "विच्छेदशून्यमिति" भा०।

**अपल** न० अपक्रमनिवृत्त्यै लाति गृह्णात्यत्र ला—बा० आधारे क। कीलके शब्द०मा०। तद्बन्धने हि अपक्रमनिवृत्तेस्तथात्वम्। नास्ति पलं मांसं यस्य। मांसशून्ये त्रि०।

**अपलाप** पु० अप+लप—घञ्। सतोऽप्यसत्त्वेन कथनरूपे अपह्नवे, "न च प्रत्यक्षसिद्धस्यापलापः कर्त्तुं शक्यते इति" अप+आनन्दे लप्यत्यनेन लप—करणे घञ्। स्नेहे मेदिनिः। स्नेहेनैवानन्दभाषणात्तथात्वम्।

**अपलाषिका** स्त्री लष इच्छायां पर्य्याये ण्वुच् लाषिका पर्य्यायेण इच्छा अप वैपरीत्ये प्रा०स०। अपर्य्यायेच्छारूपायां तृष्णायामतिशयलालसायाम् हेम०। अत्रार्थे अपलासिकेति पाठकल्पनं प्रामादिकं लसतेरिच्छार्थत्वाभावात्।

**अपलाषिन्** त्रि० अप+अपकर्षे लष—ताच्छील्यादौ घिनुण्। अनुचितधनादितृष्णाशीले। स्त्रियां ङीप्।

**अपलाषुक** त्रि० अप+अनुचितत्वात् अपकर्षे लष—ताच्छील्यादौ बा० उकञ्। अनुचितधनादितृष्णाशीले।

**अपल्यूलन** न० न पल्यूलनं शोधनम् अभावे न०त०। स्नानमार्ज्जनक्षारसंयोगादिना शोधनाभावे। "यदिदं स्नातवस्त्रं निहितमपल्यूलनकृतं भवतीति शत०ब्रा०। "अपल्यूनकृतं क्षारद्रव्यसंयोगादिनाऽधौतमिति" भा०। अत्रासमर्थसमासात् करणे नञर्थान्वय इति भेदः। तथा च रजकाधौतमिति तदर्थः। कर्मकाले रजकधौतवस्त्र परिधानस्य स्मृतौ निषेधात् तथोक्तम्।

**अपवत्** त्रि० अपः कर्म तदस्त्यस्य मतुप् वेदे मस्य लोपः। कर्मयुक्ते। "अपूप्वानपवांश्चरुरेह सीदतु" अथ०१८,४,२४।

**अपवन** न० अपकृष्टं कृत्रिमत्वात् स्वल्पत्वाच्च वनम् प्रा०त०। उपवने कृत्रिमवने हेम०। [अन्तर्गृहे वासगृहे।

**अपवरक** न० अप+व्रियते अप+वृ—कर्म्मणि बा० संज्ञायां वुन्।

**अपवरण** न० अप+वृ—भावे ल्युट्। अनावरणे आवरणापाकरणे च।

**अपवर्ग** पु० अपवृज्यते संसारोऽत्र अप+वृज—घञ् कुत्वम्। मोक्षे। "स्वपर्गापवर्गयोर्मार्गमामनन्ति मनीषिण" इति कुसुमा०। "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायादनन्तरापायादपवर्ग" इति "कृणत्रयापाकरणान्नास्त्यपवर्गः" इति च न्यायसू०। अपवर्गप्रकारस्तु मोक्षशब्दे वक्ष्यते। भावे घञ्। दाने, त्यागे च "मुष्टेरसम्भेद इवापवर्गे" किरा०। अपवृज्यते विरज्यते यस्मात् अपादाने घञ्। फलप्राप्तौ तद्धेतुके कर्म्मसमापने च 'अपवर्गे तृतीयेति" पा०। "अपवर्गे तृतीयेति भणतः पाणिनेरपीति" नैषधम् 'उदगपवर्गं सुखेषु सम्बज्यादिति' ता०ब्रा०। 'कृत्वा गते भाग्य इवापवर्गमिति" किरा० "अपवर्गं समाप्तिमिति" मल्लि०।

**अपवर्ज्जन** न० अप+वृज—ल्युट्। दानादावपवर्गार्थे। "घटापवर्जनमिति" मिताक्षरा।

**अपवर्ज्जित** त्रि० अप+वर्ज्ज—क्त। परिहृते, त्यक्ते, दत्ते च।

**अपवर्त्तन** न० अप+वृत—णिच्—ल्युट्। परिवर्त्तने, वक्रीकरणे अङ्कशास्त्रे प्रसिद्धे भाज्यभाजकयोरुभयोरपि तुल्यरूपेण केनचिदङ्केन विभाजने। 'समेन केनापवर्त्त्येति" लीला०। अपहरणे च "न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्त्तनमिति" मनुः। भावे अच् अपवर्त्तोऽप्यत्र पु०।

**अपवाद** पु० अप+वद—भावे घञ्। निन्दायाम् अपकीर्तौ 'किं करिष्यामि राज्येन सापवादेन राघव!" 'प्रकाशं च हृते तस्मिन्नपवादो भवेन्मम" इति च रामा०। मिथ्यावादे 'अपवादमात्रमबुद्धानामिति" सां०सू० "अपवादः मिथ्यावादः" भा०। कुत्सितवादे तत्रैव "अपवादः कुत्सितवाद" इति व्याख्यान्तरम्। अपोद्यते सामान्यशास्त्रं स्वविषयात् सङ्कोच्यतेऽनेन करणे घञ्। विशेषशास्त्रे। तद्धि स्वविषयं परिहृत्य सामान्यशास्त्रं विषयान्तरे व्यवस्थापयतीति तस्य सङ्कोचकं भवति यथा "मा हिंस्यात् सर्व्वाभूतानीति" श्रुतौ हिंसानिषेधस्य सर्वभूतविषयकत्वेऽपि "वायव्यं श्वेतमालभेतेति" शास्त्रं वायव्यच्छागहिंसाविषयकत्वेन विरोधात् स्वविषयात् सङ्कोचयत् तस्येतरविषयकतां व्यवस्थापयति "अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैरिति" कुमारः 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय" इति 'अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते" इति च व्या० परि०। "क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते" इति पा०भा०। अपोद्यते अपवाह्यते मिथ्याभूतमनेन अप+वद—करणे घञ्। वेदान्तमतसिद्धे मिथ्याभूतपदार्थनिवारणार्थमुपदेशभेदे। स च रज्जुविवर्त्तस्य मिथ्याभूतसर्पस्य रज्जुमात्रत्ववत् वस्तुभूतब्रह्मणो विवर्त्तस्य प्रपञ्चादेः वस्तु-